**दिनाङ्क :-28.11.2024** **प्रात: - 06:55**

**अथ वार्ता:**

**बालविवाह:**

प्रशासनेन ह्य: नवदिल्ल्यां बाल-विवाह-मुक्त-भारतमिति राष्ट्रियाभियानस्य शुभारम्भो विहित:। अभियानस्यास्य उद्देश्यमस्ति भारतदेश: बालविवाहमुक्तं राष्ट्रं भवेदिति। महिलाबालविकासमन्त्रिणा अन्नपूर्णादेव्या अभियानस्यास्य शुभारम्भ: कुर्वन्त्या प्रोक्तं यत् प्रशासनेन त्रिंशदधिकैकशतजनपदानाम् अभिज्ञानं कृतमस्ति, यत्र अभियानमिदं प्रामुख्येन प्रचालयिष्यते। तयोक्तं यत् बालविवाह: न केवलं एक: अपराधोऽस्ति अपितु मानवाधिकारणाम् उल्लंघनमपि अस्ति। अन्नपूर्णादेव्या निगदितं यत् बालविवाहमुक्तभारतमिति अभियानं केवलं दश-पञ्चदशदिवसानां आयोजनं नास्ति परमिदम् अभियानं निरन्तरतायुत: सत्प्रयासो वर्तते इति।

**झारखण्ड मुक्ति मोर्चा**

झारखण्ड मुक्ति मोर्चा दलस्य नेता हेमंत सोरेनः अद्य झारखण्ड राज्यस्य मुख्यमंत्री पदाय शपथग्रहणं करिष्यति। राँचीनगरस्य मोरहाबादी उद्याने आयोजिते कार्यक्रमे राज्यपालः संतोषकुमारगङ्गवारः श्रीसोरेनवर्याय पदस्य शपथ ग्रहणं कारयिष्यति। रांचीनगरे पत्रकारैः सह वार्तालापं कुर्वन् हेमन्तसोरेनः उक्तवान् यत् सः प्रधानमन्त्रिणं नरेन्द्रमोदीनं गृहमन्त्रीणम् अमितशाहं च I.N.D.I.A. इति संयुते: नेतार: समारोहे आमन्त्रितवान्। एकाशीतिः सदस्यीयविधानसभायां I.N.D.I.A. संयुतिः षड्पञ्चाशत् आसनानि प्राप्तवान् ।

-

**महाराष्ट्र-सर्वकारनिर्माणम् ::**

महाराष्ट्रे सर्वकारनिर्माणार्थं वार्तालापाः प्रचलन्ति। महाराष्ट्रस्य मुख्यमन्त्रीणा शिवसेनानेत्रा च एकनाथशिण्दे इत्यनेन उक्तं यत् राज्यस्य अग्रिममुख्यमन्त्रीविषये भाजपाकेन्द्रीयनेतृत्वस्य निर्णयस्य समर्थनं करिष्यति। ठाणेनगरे वार्ताहरैः सह वार्तालापं कुर्वन् एकनाथशिण्दे: नवमुख्यमन्त्रिणः निर्णयः केन्द्रीयमन्त्रिणा अमितशाहेन सह मिलित्वा भविष्यति इति उक्तवान्।

**राष्ट्रपतिः**

राष्ट्रपतिः द्रौपदीमुर्मु: तमिलनाडुराज्यस्य चतुर्दिवसीय यात्राया: प्रथमे सोपाने ह्य: कोयम्बटूर सम्प्राप्तवती। राष्ट्रपति अद्य वेलिंगटन इत्यत्र रक्षा-सेवा-समूह-महाविद्यालयस्य एकस्मिन् कार्यक्रमे भागं भजिष्यति । अत्रावधौ सङ्काय- सदस्यानां छात्रसङ्घस्य च अधिकारिणः सम्बोधयिष्यति। तदनु राष्ट्रपतिः द्रौपदी मुर्मुः शुक्रवासरे नीलगिर्यां जनजातीय-समुदायैः सह वार्तामपि विधास्यति ।

**पाकसङ्घर्षः :**

पाकिस्ताने खैबरपख्तुनख्वा-नगरे द्वयोः समुदाययोः युद्धविरामस्य अनन्तरमऽपि सुन्नी-शिया-जनजातीनां मध्ये विच्छिन्न-सङ्घर्षाः निरन्तरं भवन्ति यत्र न्यूनातिन्यूनं दश जनाः मृताः, अन्ये च एकविंशतिः जनाः घातिताः। वार्ता वाहिन्यानुसारी खैबर-पख्तुनख्वा-प्रान्ते अफगानिस्तान-सिम्नी स्थिते कुर्रम-मण्डले मंगलवासरे हिंसा अभवत्। कुर्रम-मण्डले अलिजाई-बागन-जनजातीनां मध्ये संघर्षः गतसप्ताहे शुक्रवासरे पाराचिनार्-नगरस्य समीपे यानानां उपरि गुरुवासरे आक्रमणस्य अनन्तरं गतसप्ताहे आरब्धः यस्मिन् सप्त चत्वारिंशत् जनाः मृत्युमुपगताः।

**इजसाइल-सहभागिताज्ञापनं**

इजराइल-हिजबुल्लाह इत्यनयो: मध्ये ऐतिहासिक: युद्धविराम: ह्य: क्रियान्वित: जात:। अयं विराम: मासान् यावत् प्रचलितस्य भीषण-सङ्घर्षात् अनन्तरं क्रियान्वितो अभवत्। एतस्मिन् सङ्घर्षे सहस्राधिक जना: मृता:।

**चतुरङ्ग क्रीडकः**

भारतीय-चतुरङ्ग-क्रीडकः गुकेश डोम्मराजुः ह्यः सिङ्गापुरे विश्वचतुरङ्गप्रतियोगितायाः तृतीयक्रीडायां चीनदेशस्य डिंग् लिरेन् इत्यमुं पराजित्य अन्तिमानां चतुर्दश-क्रीडा-श्रृङ्खलानां एक दशमलव पंच आर्केन समानं कृतवान्।

**।।इति वार्ता:।।**